# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्यः** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – नव्यव्याकरणम्** | **सत्रम् – २** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – परमलघुमञ्जूषा** | |

**सूचना -** **निम्नलिखितेषु एकादशसु प्रश्नेषु केषाञ्चित् पञ्च प्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ कयोः अपि द्वयोः पङ्क्त्योः अर्थः ससन्दर्भं स्पष्टीकर्तव्यः।** **१०**

१ सङ्कलनया अष्टौ स्फोटाः।

२ स्थानिनां वाचकत्वमादेशानां वेति विचारो निष्फल एव।

३ स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी

४ प्रयोजनवती रूढा च लक्षणा द्विविधा मता।

**प्रश्नः २ 'तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः' इति पङ्क्तेः विवरणं कुरुत।** **१०**

**प्रश्नः ३ शक्तिविषये तार्किकाणां मतं विलिख्य वैयाकरणद्वारा तत्खण्डनं प्रस्तुत।** **१०**

**प्रश्नः ४ तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च।** **१०**
**तत्साहचर्यात् तादर्थ्याज्ज्ञेया वै लक्षणा बुधैः॥ इति पद्यं विवृणुत।**

**प्रश्नः ५ वैयाकरणैः लक्षणायाः खण्डनं प्रस्तुत।** **१०**

**प्रश्नः ६ कयोः अपि द्वयोः पङ्क्त्योः अर्थः ससन्दर्भं स्पष्टीकर्तव्यः।** **१०**

१ किञ्च व्यञ्जकध्वनिगतकत्वगत्वादिकं स्फोटे भासते।

२ ध्वनिस्तु द्विविधः – प्राकृतः वैकृतश्च।

३ उत्थापकताविषयतान्यतरसम्बन्धेनोभयसम्बन्धेन वाऽर्थान्तरजिज्ञासाऽऽकाङ्क्षा।

४ अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति च।

**प्रश्नः ७ परमलघुमञ्जूषादिशा व्यञ्जनां प्रतिपादयत।**

**प्रश्नः ८ 'कस्तर्हि वृत्त्याश्रयः शब्दः? स स्फोटात्मक इति गृहाण' इति शास्त्रपङ्क्तेः निरूपणं कुरुत।**

**प्रश्नः ९ ग्रन्थदिशा आसत्तिनिरूपणं कार्यम्।**

**प्रश्नः१० ग्रन्थदिशा तात्पर्यविचारः निरूपणीयः।**

**प्रश्नः११ केषामपि दशानां प्रश्नानाम् उत्तराणि लेख्यानि।**

१ किन्नाम तात्पर्यम्?

२ आसत्तेः लक्षणं किम्?

३ 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इति वाक्यस्य अर्थबोधे विलम्बस्य किं कारणम्?

४ परस्परान्वयप्रयोजकधर्मवत्त्वं कस्याः लक्षणम्?

५ 'वह्निना सिञ्चति' इति वाक्यं योग्यं वा अयोग्यम्?

६ आकाङ्क्षा वस्तुतः पदस्य अर्थे भवति अथवा पुरुषे भवति?

७ शब्दस्य ग्रहणे हेतुः कः ध्वनिः भवति?

८ अभ्यासार्थे का वृत्तिः इष्टा भवति?

९ का वाक् मूलचक्रस्था भवति?

१० सकलजनश्रोत्रग्राह्यः कः भवति?

११ वाक् कतिविधा अस्ति?

१२ वैयाकरणाः लक्षणां स्वीकुर्वन्ति अथवा न?

१३ 'त्वचा ज्ञातम्' इत्यत्र त्वचः कस्मिन् अर्थे लक्षणा वर्तते?

१४ अन्वयानुपपत्तिप्रतिसन्धानं कस्याः बीजम्?

१५ कीदृशः स्फोटः मुख्यः परिगण्यते?

***